स्वतन्त्रतायाः अमृतमहोत्सवः

# शास्त्रपद्धतिः

# Śāstrapaddhatiḥ


**प्रो. श्रीनिवासः वरखेडी**

कुलपतिः

केन्द्रीयसंस्कृतविश्वविद्यालयः



**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

अमृतमहोत्सवग्रन्थमाला-०४

# शास्त्रपद्धतिः

# Śāstrapaddhatiḥ

**प्रो. श्रीनिवासः वरखेडी**

कुलपतिः

केन्द्रीयसंस्कृतविश्वविद्यालयः

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

**नवदेहली-110058**

## पुस्तकपरिचयः

भारतीयज्ञानपरम्परायाः वाङ्मयं व्याख्या-लम्बनम्। विशिष्यते चेदम् इतरपरम्पराभ्यः नानाकारणैः। व्याख्येयग्रन्थस्य भावं व्यञ्जयन्ती व्याख्या अध्येतुः अप्रतिपत्तिं विप्रतिपत्तिम् अन्यथा-प्रतिपत्तिञ्चापाकरोति। सूत्र-भाष्य-वृत्ति-वार्तिक-टीका-टिप्पण-निबन्धभेदेन विस्तृतिमापन्ना-व्याख्यापरम्परा दर्शनेषु निखिलेषु प्रथिता। काव्येषु च टीकाः काव्यसौन्दर्यमाविष्कुर्वन्तीति प्रसिद्धम्। तदेतद्व्याख्यापद्धितमाश्रित्यपरिचयात्मकोऽयं निबन्धः जिज्ञासूनां पाठकानां हस्ते पल्लवायते। भागद्वयेन निबद्धेऽस्मिन्प्रकरणे प्रथमभागे शास्त्रविचारपद्धतिः, द्वितीये च शास्त्रव्याख्या-पद्धतिश्च निरूपिते। प्रत्येकमपि भागः कालभेदेन-रचितः। प्रथमो भागः रूडकी-भारतीयप्रौद्योगिक-संस्थाने २०१६तमे वर्षे कृतानां व्याख्यानानां ततश्च महाराष्ट्रतन्त्रज्ञानसंस्थायां वेदविज्ञानविद्यापीठस्य उपोद्घातशिक्षाक्रमरूपेण निर्मितानां पाठानां सङ्ग्रहरूपः। द्वितीयश्च भागः पूर्वप्रकाशितस्य मे प्रबन्धस्य परिष्कृतं रूपम्। अनेन संयोजनेन पाठकानां सौलभ्यमितिधिया इदं प्रकाशनम्।

ISBN : 978-93-85791-50-5

# शास्त्रपद्धतिः

प्रो. श्रीनिवास वरखेड़ी
shrivara@gmail.com

प्रथम संस्करणम् : मई 2022

प्रकाशकः
कुलसचिवः, **केन्द्रीयसंस्कृतविश्वविद्यालयः**
(संसदः अधिनियमेन स्थापितः)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नवदेहली - 110058 (भारत)

All rights reserved. No reproduction or translation of this book or part thereof in any form, should be made. Neither it may be stored in a retrieval system, nor transmitted, by any means, electronic, mechanical, photocopying, recording or otherwise, without the written permission of the publisher.

© केन्द्रीयसंस्कृतविश्वविद्यालयः

मूल्यम् : रु. 200.00

मुद्रकः
**डी.वी. प्रिन्टर्स्**, 97-यू.बी., जवाहर नगर, दिल्ली-110007

# विषयसूची


शास्त्रविचारपद्धतिः . . . . . . . . . . xi

अजिह्मा शास्त्रपद्धतिः . . . . . . . . . . 1

अथाधिकारचिन्ता . . . . . . . . . . 4

विषयजिज्ञासा . . . . . . . . . . 5

इतिकर्तव्यताकाङ्क्षा . . . . . . . . . . 6

समुचितमानदण्डैः भारतीयशास्त्राणां परीक्षणम् . . . . . . . . 8

भारतीयभाषया विषयविवेचनस्य आवश्यकता . . . . . . . 9

भारतीयवाङ्मयस्य स्थूलपरिचयः . . . . . . . . . . 12

दर्शनम् . . . . . . . . . . 13

शास्त्रम् . . . . . . . . . . 14

अष्टादशविद्यास्थानानि . . . . . . . . . . 15

सकलः अखण्डः ज्ञानराशिः . . . . . . . . . . 21

प्रयोजनभेदेन प्रस्थानभेदः . . . . . . . . . . 23

व्यष्टिः - समष्टिः . . . . . . . . . . 24

पुरुषार्थः . . . . . . . . . . 26

वाङ्मयं न मोक्षमात्रपरम् . . . . . . . . . . 28

शास्त्रं नाम किम्? . . . . . . . . . . 31

धर्मशास्त्रादीनां विधिरूपत्वं कथम्? . . . . . . . . 35

शास्त्रं किं निरूपयति? . . . . . . . . . . 37

शास्त्रारम्भे मङ्गलम् . . . . . . . . . . 40

अनुबन्धचतुष्टयम् . . . . . . . . . . 41
शास्त्रप्रवृत्तिः . . . . . . . . . . 44
लक्षणम् . . . . . . . . . . 46
लक्षणनिरूपणे परिभाषा . . . . . . . . . . 52
लक्षणकरणप्रक्रिया . . . . . . . . . . 56
शास्त्रविचारपद्धतिः . . . . . . . . . . 66
शास्त्रनिर्णयः . . . . . . . . . . 75

**शास्त्रव्याख्यापद्धतिः** **77**

**पञ्चिकाप्रपञ्चः** . . . . . . . . . . 79
किं नाम व्याख्यानम् . . . . . . . . . . 83
वेदवाङ्मयविस्तरः . . . . . . . . . . 89
वेदाङ्गविस्तरः . . . . . . . . . . 90
व्याख्यायाः कार्याणि कानि? . . . . . . . . . . 93
व्याख्यालक्षणम् . . . . . . . . . . 96
शास्त्रवाङ्मयसामग्री . . . . . . . . . . 117
व्याख्याव्याजेन वादकथा . . . . . . . . . . 126
व्याख्यानाभिधानवैशिष्ट्यम् . . . . . . . . . . 128
व्याख्याकारस्य गुणदोषौ . . . . . . . . . . 131
स्वोपज्ञवृत्तयः . . . . . . . . . . 138
व्याख्यानवैशिष्ट्यम् . . . . . . . . . . 139

सन्दर्भग्रन्थसूची **143**

## प्रथमः प्राकारः

## अजिह्मा शास्त्रपद्धतिः

साम्प्रतं भारतीयवैचारिकपरम्परा सरस्वतीव गुप्तगामिनी। अस्माकं देशे नानाभाषाः नानासम्प्रदायाश्च एतादृशविचारपरम्परामालम्ब्यमानाः जीवन्ति। परन्तु वैचारिकप्रवाहः अवकुण्ठितः खण्डितश्चेत् कथमेतेषां जीवनम्? भारतीयविद्यास्थानेषु अनुगतायाः विचारपद्धतेः अस्याः पुनरुज्जीवनेन एव एष वैचारिकः प्रवाहः मन्दं मन्दं विस्तरेत्। भारतीयविचारपद्धतिः अधुना आधुनिकशिक्षापद्धतेः कारणात् अभिभूतेव दृश्यते। एतादृशविचारपद्धतेः भूमिः शास्त्रवाङ्मयम्। संस्कृतशास्त्रवाङ्मये विपुले अष्टादशविद्यास्थानानि, चतुःषष्टिः कलाः, तन्मूलानि अभिनवशास्त्राणि च अन्तर्भवन्ति। तत्र यद्यपि नानादर्शनानां न्यायमीमांसाव्याकरणसाहित्यादीनां शब्दशास्त्राणां, योगवैद्यकवास्तुशिल्पादीनां प्रयोगपराणां विद्यानां, सङ्गीतनृत्तनाट्य-

## द्वितीयः प्राकारः

# भारतीयवाङ्मयस्य स्थूलपरिचयः

वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनः। (विष्णुसहस्रनाम)

विद्या दर्शनं शास्त्रम् इत्येतत्त्रयं भारतीयपरम्परायां प्रसिद्धम्। विद्या भवति आत्मसंस्कारार्थम्। दृष्टिसंस्कारार्थं दर्शनम् अपेक्षितम्। बुद्धिसंस्कारार्थं च शास्त्रम्। एतत्त्रयम् अपि एकस्यैव एकायतनस्य तत्त्वस्य मुखत्रयम्।

> तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये।
> आयासायापरं कर्म विद्यान्या शिल्पनैपुणम्।।

का विद्या? सा विद्या या विमुक्तये। यया मोक्षः प्राप्यते सा विद्या। कस्मात् मोक्षः? बन्धनात् मोक्षः। अस्माकं बन्धनं न बाह्यं किन्तु आन्तरिकम्। अज्ञानादिभ्यः मानसिकबन्धनेभ्यः विमुक्तिः अपेक्षिता। विमुक्तिः आनन्दरूपा भवति। स्वातन्त्र्यापेक्षया अत्यन्तं सुखदायकं नान्यत् किञ्चित्। तस्मात् मोक्षः आनन्दः। आनन्दः कथं प्राप्यते? बन्धनात् मुक्तेः। बन्धनं नाम न संसारबन्धनम्, अपितु अज्ञानबन्धनं, भावबन्धनं, क्रियाबन्धनमित्याद्यपि। अतः



## प्रो. श्रीनिवासः वरखेडी

प्रो. श्रीनिवासः वरखेडीमहाभागाः अधुना नवदेहलीस्थस्य बहुपरिसरीयस्य केन्द्रीयसंस्कृतविश्व-विद्यालयस्य कौलपत्यं निर्वहन्ति। भारतीयविद्यासु आधुनिकविद्यासु च सव्यसाचिनः इमे आधुनिक-संगणकभाषाशास्त्रे अपि कृतभूरिश्रमाः सन्ति। पेजावरा-धोक्षजमठाधीश्वराणाम् अनन्तश्रीविभूषितानां विश्वेश-तीर्थस्वामिपादानाम् अन्तेवासित्वमासाद्य समग्रं नव्य-न्यायशास्त्रं परम्परापद्धत्या समध्यगुः। तदनु पाश्चात्त्य-न्यायशास्त्रमपि अधीत्य "Knowledge Representation Schemes of Navya Nyaya and Other Western Systems" इति विषये शोधप्रबन्धं समर्प्य शोधोपाधिं च अविन्दन्त। इमे नव्यन्यायपरिभाषया प्रत्ययरेखाङ्कनपद्धत्या च प्रमेयनिरूपणप्रणाली इत्यादीन् नैकान् शोधपूर्णग्रन्थान् प्राणैषुः। नैकमुख-प्रतिभासंपन्नाः इमे 2008 वर्षे महर्षि-बादरायण-व्याससम्मान-राष्ट्रपति-पुरस्कारेण पुरस्कृताः एवं चिन्मयान्तार्राष्ट्रिय शोधसंस्थया युवविदुषां कृते प्रदीयमानेन स्वर्णपदकेन 2013वर्षे सभाजिताः। प्रशासनकुशलाः एते हैदराबादस्थ-संस्कृत-अकादम्याः निदेशकरूपेण, कर्णाटकसंस्कृतविश्वविद्यालयस्य कुलपतिरूपेण च कार्यं निरवहन्। न केवलं पारम्परिकसंस्कृतविश्व-विद्यालयस्य कौलपत्यम्, अपि तु आधुनिकविद्या-प्रचाररतस्य महाराष्ट्रराज्यस्य गढचिरोलीस्थितस्य गोण्डवाना-विश्वविद्यालस्यापि कौलपत्यं समर्थरूपेण निरवहन्। अपि च नागपुरस्थकविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयस्य कौलपत्यम् निरूह्य विश्वविद्यालयस्य कीर्तिं दिगन्तेरेषु प्राख्यापयन्। एतेषां कार्यकाले एव कविकुलगुरुकालिदाससंस्कृत विश्व-विद्यालयः राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए+ श्रेण्या मानितः।

अद्यत्वे पाश्चात्यभित्तिकायां भारतीयं जीवनं चित्रितं दरीदृश्यते। अत एव भारतीयजीवनदृष्टिः लुप्तप्राया परिदृश्यते। तत्र निदानं शास्त्रदृष्टिविलोपः। शास्त्राणि केवलं रक्षितानि। शास्त्रदृष्टिः विनष्टा। तदर्थं शास्त्रदृष्टेः उज्जीवनाय शास्त्राध्ययनं केन विधिना कार्यम्? तत्र शास्त्रप्रवेशात् पूर्वं, तदारम्भे वा अवश्यज्ञेयं किम्? इति मूलभूतान् सर्वशास्त्रसाधारणान् विद्वद्दृष्टिगोचरान् कांश्चित् अंशान् सङ्गृह्य इदं प्रकरणं विरचितम्।

किं नाम शास्त्रम् इत्यारभ्य शास्त्रकार्यं, शास्त्रविचारपद्धतिः, शास्त्रव्यवस्था इत्यादयः विषयाः अत्र निरूपिताः। यद्यपि इदं प्रकरणं सरलभाषया लिखितम्; अथापि अध्यापकाः शोधार्थिनो वा अत्र अधिक्रियन्ते। अत्र शास्त्रविशेषजिज्ञासा नोद्दिष्टा। अतः सर्वसाधारविषयाः केवलं प्रतिपादिताः। अनेन शास्त्रज्ञाः शास्त्रदृष्टिशोधकाः उपकृताः भविष्यन्तीति मे विश्वासः।

**प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।**
**कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता॥** (भर्तृहरिवचनम्)

भवदीयः विद्वद्वशंवदः
**श्रीनिवासः वरखेडी**


**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**संसदः अधिनियमेन स्थापितः**
**56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058**
**दूरभाष : 011-28524993, 28521994, 28520977**
email : rsks@nda.vsnl.net.in website : www.sanskrit.nic.in